.. shrIhanumadaShTakam ..

# ॥ श्रीहनुमदष्टकम् ॥

श्री रघुराजपदाब्जनिकेतन पंकजलोचन मंगलराशे,
चण्डमहाभुजदण्डसुरारिविखण्डनपण्डित पाहि दयालो ।
पातकिनं च समुद्धर मां महतां हि सतामपि मानमुदारं,
त्वां भजतो मम देहि दयाघन हे हनुमत्स्वपदाम्बुजदास्यम् ॥१॥
संसृतितापमहानलदग्धतनूरुहमर्मतनोरतिबेलं,
पुत्रधनस्वजनात्मगृहादिषु सक्तमतेरतिकिल्बिषमूर्तेः ।
केनचिदप्यमलेन पुराकृतपुण्यसुपुंजलवेन विभो वै, त्वां
भजतो॥। ॥२॥
संसृतिकूपमनल्पमघोर्निनिदाघविदानमजस्रमशेषं,
प्राप्य सुदुःखसहस्रभुजंगविषैकसमाकुलसर्वतनोर्मे ।
घोरमहाकृपणापदमेव गतस्य हरे पतितस्य भवाब्धौ, त्वां
भजतो॥। ॥३॥
संसृतिसिन्धुविशालकरालमहाबलकालझषग्रसनार्तं,
व्यग्रसमग्रधियं कृपणं च महामदनक्रसुचक्रहृतासुम् ।
कालमहारसनोर्मिनिपीडितमुद्धर दीनमनन्यगतिं मां, त्वां
भजतो॥। ॥४॥
संसृतिघोरमहागहने चरतो मणिरंजितपुण्यसुमूर्तेः,
मन्मथभीकरघोरमहोग्रमृगप्रवरार्दितगात्रसुसन्धेः ।
मत्सरतापविशेषनिपीडितबाह्यमतेश्च कथंचिदमेयं, त्वां
भजतो॥। ॥५॥
संसृतिवृक्षमनेकशताघनिदानमनन्तविकर्मसुशाखं,
दुःखफलं करणादिपलाशमनंगसुपुष्पमचिन्त्यसुमूलम् ।
तं ह्यधिरूह्य हरे पतितं शरणागतमेव विमोचय मूढं, त्वां
भजतो॥। ॥६॥
संसृतिपन्नगवक्त्रभयंकरदंष्ट्रमहाविषदग्धशरीरं,
प्राणविनिर्गमभीतिसमाकुलमन्धमनाथमतीव विषण्णम् ।
मोहमहाकुहरे पतितं दययोद्धर मामजितेन्द्रियकामं, त्वां
भजतो॥। ॥७॥
इन्द्रियनामकचौरगणैर्हृततत्वविवेकमहाधनराशिं,
संसृतिजालनिपातितमेव महाबलिभिश्च विखंडितकायम् ।
त्वत्पदपद्मनुत्तममाश्रितमाशु कपीश्वर पाहि कृपालो, त्वां
भजतो॥। ॥८॥

ब्रह्ममरुद्गणरूद्रमहेन्द्रकिरीटसुकोटिलसत्पद पीठं
दाशरथिं जयति क्षितिमण्डल एष निधाय सदैव हृदब्जे ।
तस्यहनूमत एव शिवंकरमष्टकमेतदनिष्टहरं वै,
यः सततं हि पठेत्स नरो लभतेऽच्युतरामपदाब्जनिवासम् ॥ ९॥
॥ श्रीमधुसूदनाश्रमशिष्याच्युतविरचितं श्रीमद्धनुमदष्टकं
संपूर्णम् ॥

Visit http://www.webdunia.com for additional texts with Hindi meanings.

---

Please send corrections to sanskrit@cheerful.com
Last updated November 22, 2001